श्री कार्तिकेय स्तोत्रं

श्री कार्तिकेय स्तोत्रं

कार्तिकेय करुणामृतराशे
कार्तिके यतहृदा तव पूजा |
पूर्तये भवति वांछितपंक्तेः
कीर्तये च रचिता मनुजेन || 1 ||

अत्यंतपापकर्मा
मत्तुल्यो नास्ति भूतले गुह भो |
पूरयसि यदि मदिष्टं
चित्रं लोकस्य जायते भूरि || 2 ||

कारागृहस्थितं य-
-श्चक्रे लोकेशमपि विधातारम् |
तमनुल्लंघितशासन-
-मनिशं प्रणमामि षण्मुखं मोदात् || 3 ||

नाहं मंत्रजपं ते
सेवां सपर्यां वा |
नैसर्गिक्या कृपया
मदभीष्टं पूरयाशु तद्गुह भो || 4 ||

निखिलानपि मम मंतू-
-न्सहसे नैवात्र संशयः कश्चित् |
यस्मात्सहमानसुत-
-स्त्वमसि कृपावारिधे षडास्य विभो || 5 ||

यदि मद्वाच्छितदाने
शक्तिर्नास्तीति षण्मुख ब्रूषे |
तदनृतमेव स्यात्ते
वाक्यं शक्तिं दधासि यत्पाणौ || 6 ||

मयूरस्य पत्रे प्रलंबं पदाब्जं
दधानं ककुद्येव तस्यापरं च |
सुरेंद्रस्य पुत्र्या च वल्ल्या च पार्श्व-
-द्वयं भासयंतं षडास्यं भजेऽहम् || 7 ||

विवेकं विरक्तिं शमादेश्च षट्कं
मुमुक्षां च दत्त्वा षडास्याशु मह्यम् |
विचारे च बुद्धिं दृढां देहि वल्ली-
-सुरेंद्रात्मजाश्लिष्टवर्ष्मन्नमस्ते || 8 ||

सुरेशानपुत्रीपुलिंदेशकन्या-
-समाश्लिष्टपार्श्वं कृपावारिराशिम् |
मयूराचलाग्रे सदा वासशीलं
सदानंददं नौमि षड्वक्त्रमीशम् || 9 ||

स्वभक्तैर्महाभक्तितः पक्वदेहा-
-न्समानीय दूरात्पुरा स्थापितान्यः |
क्षणात्कुक्कुटादीन्पुनः प्राणयुक्ता-
-न्करोति स्म तं भावयेऽहं षडास्यम् || 10 ||

रवजितपरपुष्टरव
स्वरधिपपुत्रीमनोऽब्जशिशुभानो |
पुरतो भव मम शीघ्रं
पुरहरमोदाब्धिपूर्णिमाचंद्र || 11 ||

शतमखमुखसुरपूजित
नतमतिदानप्रचंडपदसेव |
श्रितजनदुःखविभेद-
-व्रतधृतकंकण नमोऽस्तु गुह तुभ्यम् || 12 ||

वृष्टिं प्रयच्छ षण्मुख
मय्यपि पापे कृपां विधायाशु |
सुकृतिषु करुणाकरणे
का वा श्लाघा भवेत्तव भो || 13 ||

महीजलाद्यष्टतनोः पुराणां
हरस्य पुत्र प्रणतार्तिहारिन् |
प्रपन्नतापस्य निवारणाय
प्रयच्छ वृष्टिं गुह षण्मुखाशु || 14 ||

पादाब्जनम्राखिलदेवताले
सुदामसंभूषितकंबुकंठ |
सौदामनीकोटिनिभांगकांते
प्रयच्छ वृष्टिं गुह षण्मुखाशु || 15 ||

शिखिस्थिताभ्यां रमणीमणिभ्यां
पार्श्वस्थिताभ्यां परिसेव्यमानम् |
स्वयं शिखिस्थं करुणासमुद्रं
सदा षडास्यं हृदि भावयेऽहम् || 16 ||

भूयाद्भूत्यै महत्यै भवतनुजननश्चूर्णितक्रौंचशैलो
लीलासृष्टांडकोटिः कमलभवमुखस्तूयमानात्मकीर्तिः |
वल्लीदेवेंद्रपुत्रीहृदयसरसिजप्रातरादित्यपुंजः
कारुण्यापारवारांनिधिरगतनयामोदवाराशिचंद्रः || 17 ||

इति श्रीशृंगेरिजगद्गुरु श्रीसच्चिदानंद शिवाभिनवनृसिंहभारती स्वामिभिः विरचितं श्री कार्तिकेय स्तोत्रम् |